# JOURNAL

OF THE

BOMBAY BRANCH

OF THE

ROYAL ASIATIC SOCIETY

Vol. 20 1944


## CHANDONUŚĀSANA OF HEMACANDRA[1]

(Chs. VI and VII)


By H. D. Velankar


# अथ हैमं छन्दोऽनुशासनम् ।

## षष्ठोऽध्यायः ।

**सन्ध्यादौ कडवकान्ते च ध्रुवं स्यादिति ध्रुवा ध्रुवकं घत्ता वा ॥ १ ॥**
कडवकसमूहात्मकः सन्धिस्तस्यादौ चतुर्भिः पद्धडिकाद्यैश्छन्दोभिः कडवकम् । तस्यान्ते ध्रुवं निश्चितं स्यादिति ध्रुवा, ध्रुवकं, घत्ता वेति संज्ञान्तरम् । **सा त्रेधा षट्पदी चतुष्पदी द्विपदी च ॥ २ ॥** सेति ध्रुवा । **कडवकान्ते प्रारब्धार्थोपसंहारे आद्ये छड्डुणिका च ॥ ३ ॥** प्रारब्धस्य प्रकरणायातस्यार्थस्य कडवकान्ते भङ्ग्यन्तरेणाभिधाने षट्पदीचतुष्पद्यावेव छड्डणिकासंज्ञे ; न केवलं ध्रुवादिसंज्ञे छड्डणिकासंज्ञे चेति चार्थः । षट्पदीचतुष्पदीध्रुवयोश्च सप्तकलादयः सप्तदशकलान्ताः पादा भवन्तीति तेषु गणनियममाह ।

**ध्रुवायां छैः कलाभिः पादे चतौ पदौ वा ॥ ४ ॥**
ध्रुवायां छैरिति सप्तभिः कलाभिः पादे चतुर्मात्रत्रिमात्रौ पञ्चमात्रद्विमात्रौ वा गणौ भवतः ।

---

[1] Continued from the last volume. In the illustrations of the different metres in chs. VI and VII also, the name of the particular metre is skilfully introduced by the author, as in chs. IV-V. I have not marked it in them, by a line under the word, as this can be easily known now.—H. D. V.

**जैः पतौ षदौ चौ वा ॥ ५ ॥**

जैरित्यष्टभिः कलाभिः पादे पञ्चमात्रत्रिमात्रौ षण्मात्रद्विमात्रौ द्वौ वा चतुर्मात्रौ गणौ भवतः ।

**झैः षतौ तिः पचौ वा ॥ ६ ॥**

झैरिति नवभिः कलाभिः पादे षण्मात्रत्रिमात्रौ त्रिमात्रत्रयं पञ्चमात्रचतुर्मात्रौ वा गणौ भवतः ।

**ञैश्चादौ षचौ पौ वा ॥ ७ ॥**

ञैरिति दशभिः कलाभिः पादे चतुर्मात्रद्वयद्विमात्रौ षण्मात्रचतुर्मात्रौ द्वौ वा पञ्चमात्रौ गणौ भवतः ।

**टैश्चपदं पचदं षदतं चानौ वा ॥ ८ ॥**

टैरित्येकादशभिः कलाभिः पादे चतुर्मात्रपञ्चमात्रद्विमात्राः पञ्चमात्रचतुर्मात्रद्विमात्राः षण्मात्रद्विमात्रत्रिमात्राश्चतुर्मात्रद्वयत्रिमात्रौ वा गणा भवन्ति ।

**ठैश्चपतं षचदं पादौ चिर्वा ॥ ९ ॥**

ठैरिति द्वादशभिः कलाभिः पादे चतुर्मात्रपञ्चमात्रत्रिमात्राः षण्मात्रचतुर्मात्रद्विमात्राः पगणद्वयद्विमात्रौ चतुर्मात्रत्रयं वा गणा भवन्ति ।

**डैः पातौ चापौ षचतं वा ॥ १० ॥**

डैरिति त्रयोदशभिः कलाभिः पादे पञ्चमात्रद्वयत्रिमात्रौ चतुर्मात्रद्वयपञ्चमात्रौ षण्मात्रचतुर्मात्रत्रिमात्रा वा गणा भवन्ति ।

**ढैश्चिदौ षचचं वा ॥ ११ ॥**

ढैरिति चतुर्दशभिः कलाभिः पादे चतुर्मात्रत्रयद्विमात्रौ षचचा वा गणा भवन्ति ।

**णैश्चितौ पिर्वा ॥ १२ ॥**

णैरिति पञ्चदशभिः कलाभिः पादे चतुर्मात्रत्रयत्रिमात्रौ त्रयो वा पञ्चमात्रा गणा भवन्ति ।

**तैः षचादं चीर्वा ॥ १३ ॥**

तैरिति षोडशभिः कलाभिः पादे षण्मात्रचतुर्मात्रद्वयद्विमात्राश्चत्वारो वा चतुर्मात्रा गणा भवन्ति ।

**थैः षचातं चिपौ वा ॥ १४ ॥**

थैरिति सप्तदशभिः कलाभिः पादे षण्मात्रचतुर्मात्रद्वयत्रिमात्राश्चतुर्मात्रत्रयपञ्चमात्रौ वा गणा भवन्ति । एवं च सप्तादिसप्तदशान्तकलौघेभ्यस्त्रिभिरतुल्यैस्तुल्यातुल्यैः तुल्यैर्वार्द्धे पादा यत्र भवन्ति सा विदग्धगोष्ठीगरिष्ठा षट्पदी ध्रुवा । षट्पदीषु चाद्यस्य पादस्य द्वितीयेन तृतीयस्य षष्ठेन चतुर्थस्य पञ्चमेनानुप्रासः कर्तव्यः । चतुष्पदीष्वाद्यस्य द्वितीयेन तृतीयस्य चतुर्थेन । अन्तरसमासु सङ्कीर्णासु च प्रायेण द्वितीयस्य चतुर्थेनानुप्रासः कार्यः । तत्र षट्पदीभेदानाह—

**तृतीयषष्ठयोर्दशादिसप्तदशान्ताः कलाः शेषेषु सप्त षट्पदी षट्पदजातिरष्टधा ॥ १५ ॥**

तृतीयषष्ठयोः पादयोः दशादयो मात्रा एकैकवृद्ध्या यावत् सप्तदश, अन्येषु चतुर्षु पादेषु सप्तैव यत्र भवन्ति, सा षट्पदजातिर्नाम षट्पदी भवति। सा च दशादीनां सप्तदशान्तानामष्टविधत्वादष्टधा। तत्राद्या यथा—

इअ नारिहिं। रससारिहिं। मुहपरिमल[1]लुद्धओ॥
दुरु ढोल्लइ। न हु मेल्लइ। छप्पयगणु मुद्धओ॥ १॥

एवं शेषभेदेषूदाहार्यम्।

## अष्टौ उपजातिः॥ १६॥

तृतीयषष्ठयोः पादयोर्दशादिसप्तदशान्ताः कलाः शेषेष्वष्टौ चेत्तदोपजातिर्नाम षट्पदी। पूर्ववदष्टधा। तत्राद्या यथा—

इअ उवजाइहिं। सुरहिअवाइहिं। गुंजिरघणछप्पउ॥
उव वण सारओ। केअइफारओ। कमु[2] नवि रइ अप्पओ॥ २॥

एवं शेषभेदेषूदाहार्यम्।

## नवावजातिः॥ १७॥

तृतीयषष्ठयोः पादयोर्दशादिसप्तदशान्ताः कलाः शेषेषु नव चेत्तदाऽवजातिर्नाम षट्पदी। पूर्ववदष्टधा। तत्राद्या यथा—

इअ वणराइहिं। अहिणवजाइहिं। छप्पओ परिभमई॥
मालइरत्तओ। महुरसमत्तओ। जलयागमसमई॥ ३॥

एवं शेषभेदेषूदाहार्यम्। एवं षट्पदजात्युपजात्यवजातीनां प्रत्येकमष्टविधत्वाच्चतुर्विंशतिधा षट्पदी।

## चतुष्पदी वस्तुकं वान्तरसमार्द्धसमा संकीर्णा सर्वसमा च॥ १८॥

---

[1] परिमलु SA.    [2] कुमु NA.

---

अथ षष्ठाध्यायस्य पर्यायाः प्रारभ्यन्ते। आद्ये छड्डुणिका चेत्यत्र। प्रथमे षट्पदीचतुष्पद्यौ संज्ञे। त्रिभिरतुल्यैरिति तुल्यकलालक्षणं वा अर्धसमं एकः पादोऽपरं द्वयं चान्यत्। अथवा सर्वैरप्यन्यैः॥ इअ नारिहिं इत्यत्र। एष रससारायाः नार्याः मुखपरिमललुब्धः सन्मुग्धः षट्पदगणः पार्श्वं न मुञ्चति। हु निश्चितम्॥ १॥ इअ उवजाइहिं इत्यत्र। गुञ्जद्बहुषट्पदं सारं प्रधानं केतकीस्फारं एतद्वनं कस्य रइं रतिं नार्पयति काभिः उपजातिभिः समीपस्थजातिभिः कथंभूताभिः सुरभितवाताभिः॥ २॥ इअ वणराइहि-मित्यत्र। एष षट्पदोऽभिनवजातिषु वनराजिषु परिभ्रमति क्व जलदागमसमये मेघसमये कीदृशः मालत्यां रक्तः

वस्तुकमिति चतुष्पद्या एव नामान्तरम् । तुल्यसमपादा तुल्यविषमपादा च अन्तरेण व्यवधानेन समान्तरसमा । तुल्यप्रथमद्वितीयपादा तुल्यतृतीयचतुर्थपादा चार्धं सममस्या अर्धसमा । व्यामिश्रा सङ्कीर्णा । तुल्यचतुष्पदा सर्वसमा । तत्रान्तरसमाः प्राह—

**चतुष्पदी कला ओजे सप्ताद्याः षोडशान्ताः समे प्रत्येकं सैकाः सप्तदशान्ताः 'चम्पककुसुम-सामुद्रक-मल्हणक-सुभगविलास-केसर-रावण-हस्तक-सिंहविजृम्भित-मकरन्दिका-मधुकरविलसित-चम्पककुसुमावर्त्ताः । मणिरत्नप्रभा-कुङ्कुमतिलक-चम्पकशेखर-क्रीडनक-बकुलामोद-मन्मथतिलक-मालाविलसित-पुण्यामलक-नवकुसुमितपल्लवाः । मलयमारुत-मदनावास-माङ्गलिका-अभिसारिका-कुसुमनिरन्तर-मदनोदक-चन्द्रोद्योत-रत्नावल्यः । भ्रूचक्रणक-मुक्ताफलमाला-कोकिलावली-मधुकरवृन्द-केतकीकुसुम-नवविद्युन्माला-त्रिवलीतरङ्गकाणि । अरविन्दक-विभ्रमविलसितवदन-नवपुष्पन्धय-किन्नरमिथुनविलास-विद्याधरलीला-सारङ्गाः । कामिनीहास-अपदोहक-प्रेमविलास-काञ्चनमाला-जलधरविलसिताः । अभिनवमृगाङ्कलेखा-सहकार-कुसुममञ्जरी-कामिनीक्रीडनक-कामिनीकङ्कणहस्तकाः । मुखपालनतिलक-वसन्तलेखा-मधुरालापिनीहस्ताः ॥ मुखपङ्क्ति-कुसुमलतागृहे । रत्नमालेति पञ्चपञ्चाशद्भेदाः ॥ १९ ॥**

ओजयोः सप्ताद्याः षोडशान्ताः कलाः समयोस्ता एवैकाधिकाद्याः सप्तदशान्ताः प्रत्येकं यत्र भवन्ति सा चतुष्पदी चम्पककुसुमादिसंज्ञा । अयमर्थः—ओजे सप्त कलाः समे सैकाद्या अष्टाद्याः सप्तदशान्ता यत्र भवन्ति सा चम्पककुसुमादिभेदेन दशविधा । एवमोजेऽष्टकलाः समे सैकाद्या नवाद्याः सप्तदशान्ता यत्र भवन्ति सा मणिरत्नप्रभादिभेदेन नवविधा । तथा ओजे नव समे सैकाद्याः दशाद्याः सप्तदशान्ता यत्र भवन्ति सा चतुष्पदी मलयमारुतादिभेदेनाष्टविधा । यावदोजे षोडश समे सप्तदश यत्र भवन्ति सा रत्नमालासंज्ञा चतुष्पदी । एवं पञ्चपञ्चाशच्चतुष्पदीभेदाः । तत्रौजे सप्त समेऽष्टौ चम्पककुसुमम् । यथा—

अंगचंगिम । जइ गोरंगिहिं ॥
चंपयकुसुम । ता कह अग्घहिं ॥ ४ ॥

---

पुनः कीदृग् मधुरसमत्तः ॥ ३ ॥ तुल्यसमपादेति तुल्यौ सदृशौ समौ द्वितीयतुर्यौ पादौ यस्याः अथवा तुल्यौ विषमौ प्रथमतृतीयौ यस्याः इति लक्षणेनान्तरं व्यवधानं भवति ॥ अंगचंगिमेत्यत्र । यदि गौराङ्ग्या

ओजे सप्त समे नव सामुद्रकम् । यथा—

जइ बोल्लइ । घण[1] उक्कंठिअ ॥
सा मुद्दओ । मुहु कलयंठिअ ॥ ५ ॥

ओजे सप्त समे दश मल्हणकम् । यथा—

कहिं हंसिहिं । तल्लोव्वेल्लणउं ॥
जउ दीसइ । गओ तहिं मल्हणउं ॥ ६ ॥

ओजे सप्त समे एकादश सुभगविलासः । यथा—

पइं विणु तहिं । सुहय विलासु कवणु ॥
विणुं चंदइं । मुहु जामिणिहिं कवणु[2] ॥ ७ ॥

ओजे सप्त समे द्वादश केसरम् । यथा—

मेल्लि[3] माणु । वल्लहि करि अणुराओ[4] ॥
ओ उड्डिओ[5] । केसरकुसुमपराओ ॥ ८ ॥

ओजे सप्त समे त्रयोदश रावणहस्तकः । यथा—

लेहि वीण । करिं धरि रावणहत्थउ[6] ॥
जिनमज्जणि । सुरहिं दिन्नुसम्वहत्थउ ॥ ९ ॥

ओजे सप्त समे चतुर्दश सिंहविजृम्भितम् । यथा—

छुहखामुवि । जं मयजूहु न तिणु चरइ ॥
तं अज्जवि । सीहविअंभिउ विप्फुरइ ॥ १० ॥

---

[1] घण Bom.; SA. [2] Read किवणु; see Com. [3] मेल्हि Com.
[4] अणुराउ Bom.; SA. [5] उड्डिओ Bom. [6] हत्थओ NA.

---

अङ्गचङ्गिमा स्यात्तदा चम्पककुसुमानि कथं अर्घ्यन्ते ॥ ४ ॥ जइ बोल्लइ इत्यत्र । यदि सा उत्कण्ठिता सती धन्या जल्पति तदा कलकण्ठी मुखं मुद्रयतु ॥ ५ ॥ कहिं हंसिहिं इत्यत्र । क्व हंस्याः तल्लं सरसी तत्रोद्वेल्लनकं क्रीडनकं क्वापि नेत्यर्थः । यदि तस्या गतं गमनं मल्हणकं सविलासं दृश्यते तदित्यर्थः ॥ ६ ॥ पइं विणु तहिमित्यत्र । हे सुभग त्वया विना कलाविलासः कवणु कीदृशो न किमपीत्यर्थः ॥ चन्द्रेण विना यथा यामिन्याः मुखं कृपणं दीनं भवतीत्यर्थः ॥ ७ ॥ मेल्हि माणु इत्यत्र । हे सखि मानं मुञ्च वल्लभेनुरागं कुरु । उत्ति पश्य केसरो वृक्षविशेषस्तस्य परागः । उड्डिओत्ति प्रसृतः व्याप्त इत्यर्थः ॥ वसन्तागमसूचनमिति । वसन्ते मदनातुरा भविष्यसि अतएव भर्तारं मानयेत्यर्थः ॥ ८ ॥ लेहि वीण करीत्यत्र । रावणहस्तकः आतोद्यं यत् पुरा दशास्येनाष्टापदे जिनेन्द्राणामग्रे स्वहस्तनसामुत्पाट्य वादितं त्रितन्त्रीरूपं वृद्धपंकं (?) वाद्यम् । वीणां लात्वा करे धृत्वा रावणहस्तकं जिनमज्जनसमये सुरैर्गानं कृतमित्यध्याहारः कथं दत्तसन्मुखहस्तकं यथा भवति तथा ॥ ९ ॥ छुहखामुवि इत्यत्र । क्षुत्क्षाममपि

ओजे सप्त समे पञ्चदश मकरन्दिका । यथा—

कुसुमंतरि । नवि लग्गइ अलि अवनिद्दियइ ॥
आसत्तओ । मालइहि बहलमयरंदिअहि ॥ ११ ॥

ओजे सप्त समे षोडश मधुकरविलसितम् । यथा—

जं जाइहिं । किति दिअंतरु[1] धवलइ सयलु ॥
तं जाणसु[2] । माणिणि महुअरविलसिउ पवलु ॥ १२ ॥

ओजे सप्त समे सप्तदश चम्पककुसुमावर्तः । यथा—

निअइ झुणइ[3] । परिरंभइ चुम्बइ महुसुंडओ ।
अलि मुज्झइ । चंपयकुसुमावट्टि निबुड्डओ[4] ॥ १३ ॥

एवं दश । तथा ओजे अष्टौ समे नव मणिरत्नप्रभा । यथा—

मणिरयणपहा- । पयडिअगिरिगुहु ॥
साहइ भरहु । सयलुवि दिसिमुहु ॥ १४ ॥

ओजे अष्टौ समे दश कुङ्कुमतिलकम् । यथा—

रेहइ चंदो । नवपयडिअकलओ ।
पुव्वदिसाए । किर कुंकुमतिलओ ॥ १५ ॥

ओजे अष्टौ समे एकादश चम्पकशेखरः । यथा—

अलिरवगीई । कयचंपयसेहरु[5] ॥
महुसमयसिरी । उअ[6] जणहु मणोहरु ॥ १६ ॥

---

[1] दिअतरु Bom. [2] माणसु Com. [3] मुणइ Bom.; झणइ SA.
[4] निबुडुओ Bom.; निबुट्टओ NA. [5] सिहरु Bom. [6] ओअ Bom.

---

यन्मृगयूथं तृणं न चरति तत्सिंहविजृम्भितमद्यापि स्फुरति ॥ १० ॥ कुसुमंतरीत्यत्र । अलिरपनिद्रे विकसिते कुसुमान्तरे न लगति वहलमकरन्दिकायां मालत्यामारक्तः सन् ॥ ११ ॥ जं जाइहिमित्यत्र । यत् जातिः कीर्त्या (जातेः कीर्तिः ?) धवलीकरोति किं दिगन्तरं तत् हे मानिनि मानय भ्रमरविलसितं अत्र अन्योक्तिः स्वप्रथा तस्या गौणकथनम् ॥ १२ ॥ निअइ झुणइ इत्यत्र । हे मित्र पश्य शौण्ड इव शौण्डो मद्यपः मत्तश्चासौ शौण्डश्च मत्तशौण्डोलिर्निरीक्षते ध्वनति परिरम्भति उपगूहति चुम्बति चम्पककुसुमावर्ते निमग्नः सन्मुह्यति मोहं भजति ॥ १३ ॥ मणिरयणेत्यत्र । मणिरत्नप्रभाभिः प्रकटिता गिरिगुम्फा यस्मात् स तथा एवंविधो भरतः साधयति सकलमपि दिङ्मुखम् ॥ १४ ॥ रेहइ चंदो इत्यत्र । राजते चन्द्रः नूतना प्रकटिता कला येन सः किलेति उत्प्रेक्षते पूर्वदिशः कुङ्कुमतिलकः ॥ १५ ॥ अलिरवेत्यत्र । अलिरव एव गीतिर्गानं यस्याः सा कृतश्चम्पक एव शेखरो या सा अयं स्त्रीधर्मः । एवंविधां जनानां

ओजे अष्टौ समे द्वादश क्रीडनकम् । यथा—

सहि वट्टुलओ[1] । चन्दुल्लओ पडिहाइ ॥
रयणिवहूए । कीलणगेंदुओ[2] नाइ ॥ १७ ॥

ओजे अष्टौ समे त्रयोदश बकुलामोदः । यथा—

मन्नावि प्रिओ । जइवि हु सो कयदुन्नओ ॥
जं महमहेइ[3] । दुसहउ बउलामोअओ[4] ॥ १८ ॥

ओजे अष्टौ समे चतुर्दश मन्मथतिलकम् । यथा—

निम्मलि गयणि । समुग्गओ चंदु विहावइ ॥
रइए[5] रइओ । वम्महतिलओ[6] नवु नावइ ॥ १९ ॥

ओजे अष्टौ समे पञ्चदश मालाविलसितम् । यथा—

कमलिणिपासि । अलिमाला विलसिअ[7] संपइ ॥
कलरवमिसिण । किर मित्तसमागमु जंपइ ॥ २० ॥

ओजे अष्टौ समे षोडश पुण्यामलकम् । यथा—

मइं असरण तुहुं । अइनिद्दय[8] नडसि कुसुमाउह[9] ।
जं किर पुण्णा[10] । मलयसमीरिण सयलवि कउह[11] ॥ २१ ॥

ओजे अष्टौ समे सप्तदश नवकुसुमितपल्लवः । यथा—

कंपिअ निअवि । नवकुसुमिअपल्लव सललिअ लय ॥
संभरि दइअ । पंथिअसत्थ तक्खणि गय विलय ॥ २२ ॥

---

[1] वट्टुलओ Bom. [2] गंडुओ Bom.; गंदुउ NA. [3] महमहइ NA.; SA.
[4] मोअउ Bom.; NA.; SA. [5] रइप Bom. [6] तिलउ SA.
[7] विलसइ ? Com. [8] निद्दयं Bom. [9] कुसुमहि उह Bom.
[10] पुप्फा Bom. [11] कओह SA.

---

मनोहरां मधुसमयश्रीं पश्य विलोकयेत्यर्थः ॥ १६ ॥ सहि वट्टुलउ इत्यत्र । हे सखि वृत्तश्चन्द्रः प्रतिभाति नाइ इति उत्प्रेक्षते रजनीवध्वाः क्रीडागेन्दुकः ॥ १७ ॥ मन्नावि इत्यत्र । हे सखि यद्यपि कृतदुर्नयः प्रियो वर्तते तथापि मन्नावीति आत्मसात्कुरु यस्मान्महमहेति गन्धं भजते कः दुःसहो बकुलामोदः वसन्तागमसूचनमिति ॥ १८ ॥ निम्मलि गयणीत्यत्र । निर्मले गगने समुद्गतश्चन्द्रो विभाति नावइइति इवार्थे विभाव्यते रत्या रचितो मन्मथतिलक इव ॥ १९ ॥ कमलिणिपासीत्यत्र । कमलिनीपार्श्वे सांप्रतं अलिमाला विलसति किलेति संभाव्यते ॥ कलरवमिषेण मित्रस्य सूर्यस्य समागमं जपति कथयति ॥ २० ॥ मइं असरण इत्यत्र । तस्मात्कारणात् हे कुसुमायुध मां अशरणां खेदयसि यस्मान्मलयसमीरणेन सकला अपि ककुभः पूर्णाः ॥ २१ ॥ कंपिअ निअवीत्यत्र । कम्पिताः निअवीति दृष्ट्वा कुसुमितपल्लवाः सलीला लता

एवं नव। तथा ओजे नव समे दश मलयमारुतः। यथा—

देक्खिवि वेल्लडी। मलयमारुअधुआ ॥
सुमरिवि गोरडि। पंथिअसत्थ मुआ ॥ २३ ॥

ओजे नव समे एकादश मदनावासः यथा—

जं धणलोअण-। झसझय। चल दीसहिं।
मयणावासउ। तं थणगुद्दिरि[1] सइ ॥ २४ ॥

ओजे नव समे द्वादश माङ्गलिका। यथा—

प्रियमहुसंगमि। ओअ[2] मंगलिअइं करइं।
किंसुअरूविण। वणसिरि घट्टइं धरइ ॥ २५ ॥

ओजे नव समे त्रयोदश अभिसारिका। यथा—

काली रत्तडी। घणिहिं नहंगणु रुद्धओ[3] ॥
तोवि न वट्टहिं। अहिसारिअजणु खुद्धओ[4] ॥ २६ ॥

ओजे नव समे चतुर्दश कुसुमनिरन्तरः। यथा—

सिद्धत्थ पुलय। कुसुम निरन्तरु हसिओ सिओ ॥
नवदइआगमि। अंगिजि मंगलु घणइ किउ[5] ॥ २७ ॥

ओजे नव समे पञ्चदश मदनोदकम्। यथा—

घणरव दूसहा। दूहवइ मयणोदओ[6] हिअओ[7] ॥
पिअदूरट्ठिआ। पवसिअरमणिअणु कह जिअओ[8] ॥ २८ ॥

---

[1] घणगुहिर Bom.; थणगुदुरि SA. [2] उअ Com. [3] रुद्धउं NA.
[4] खुद्दओ Bom. [5] किसउ NA. [6] मयणोदउ SA.
[7] हिअउ SA. [8] जिअउ SA.

---

स्मृत्वा च दयितां पथिकसार्थः विलयं मरणं प्राप्तः ॥ २२ ॥ देक्खिवीत्यत्र। दृष्ट्वा का मलयमारुतधुना वल्लीस्ततो गौरीः स्मृत्वा ता अपि चञ्चलरूपा भवन्ति पथिकसार्थो मृतः ॥ २३ ॥ जं धण इत्यत्र। यत् धन्याया लोचनान्येव झषध्वजाः मत्स्यकेतवश्चला दृश्यन्ते लोचनानि हि चपलत्वात् मीनरूपाणि वर्ण्यन्ते तत् ज्ञायते मदनावासाः स्तनप्रदेशे सन्तीति ॥ २४ ॥ प्रियमहुसंगमीत्यत्र। उअत्ति पश्य वनश्रीः प्रियो वल्लभो यो मधुर्वसन्तस्तस्य संगमे संबन्धे माङ्गलिकानि करोति किंशुकरूपेण घट्टयुगलं दधाति घटो घाटडीति प्रसिद्धा ॥ २५ ॥ काली रत्तेत्यत्र। रात्रिः कृष्णा तथा गगनाङ्गणं घनैरुद्धं तथापि मार्गे अभिसारिकाजनो न क्षुब्धो भीत्यभाव इत्यर्थः ॥ २६ ॥ सिद्धत्थेत्यत्र। पुलका एव सिद्धार्थाः सितं हसितं कुसुमानि निरन्तरं नवदयितसंगमे अङ्गे मङ्गलं भार्यया कृतम् ॥ २७ ॥ घणरवदूसहेत्यत्र। घनानां रवा दुःसहा

ओजे नव समे षोडश चन्द्रोद्योतः। यथा—

कोइलकलरवु। चंदणु चंदुज्जोअविलासु॥
वल्लहसंगमि। अमयरसु; विरहि जलिउ हुआसु॥ २९॥

ओजे नव समे सप्तदश रत्नावली। यथा—

मालइमालहिं। अलि सहहिं नवमयरंदसइण्ह।
नं[1] रयणावलि। नीलमय पाउसदइइण[2] दिण्ण॥ ३०॥

एवमष्ट। तथा ओजे दश समे एकादश भ्रूचक्रणकम्। यथा—

रेहइ तरुणिअणु[3]। भूचंकणचंगओ।
आणावइ नाइ। तिहुअणजइ अंगओ[4]॥ ३१॥

ओजे दश समे द्वादश मुक्ताफलमाला। यथा—

तारावलि भणि मा। भणि मुत्ताहलमाली॥
रइकलहिण त्रुट्टी। ससिरयणिहुं सुविसालि॥ ३२॥

ओजे दश समे त्रयोदश कोकिलावली। यथा—

कोइलावलिकए। संगीअइ नच्चावओ(उ)।
नवलयविलयाओ। मलयानिलु[5] नट्टावउ॥ ३३॥

ओजे दश समे चतुर्दश मधुकरवृन्दम्। यथा—

फुल्लियलय निअवि। महुअरवंद्रिण[6] गीउ तह॥
बाहोल्लयनयण। पयमवि पहिअ न दिंति जह॥ ३४॥

---

[1] न Bom.; णं Com. [2] पाओसदइसदा SA. [3] अणु SA.
[4] अणंगओ? see Com. [5] मलयानिल NA. [6] वंदिण SA.

---

दुनोति मदनोदयो हृदयं प्रियदूरस्थितः दूरस्थितधनिकः प्रोषितानां रमणीजनः कथं जीवति॥ २८॥ कोइलकलेत्यत्र। कोकिलकलरवः चन्दनं चन्द्रोद्योतविलासः एतान्येव वल्लभसंगमेऽमृतरसः विरहे सति तान्येव ज्वलितो हुताशः॥ २९॥ मालइमालहिं इत्यत्र। मालतीमालायां अलयः शोभन्ते कीदृशा अलयः नवमकरन्दसतृष्णाः किमित्यध्याहारः। प्रावृड्-दयितेन दत्ता नीलेन्द्रमयी रत्नावलीव। णं इति उपमानार्थः॥ ३०॥ रेहइ इत्यत्र। राजते तरुणीजनः भ्रूचक्रेण चङ्ग इवोत्प्रेक्षते त्रिभुवनजयी अनङ्गः आज्ञापयति जनानामिति शेषः॥ ३१॥ तारावलीत्यत्र। हे सुभग तारावलीं मा भण। किं तर्हि मुक्ताफलमालां भण रतिकलहेन त्रुटितां शशिरजन्योः सुविशालाम्॥ ३२॥ कोइलावलीत्यत्र। कोकिलावलीकृते संगीतके नर्तयतु नवलतावनिताः कर्म मलयानिल एव नर्तकः॥ ३३॥ फुल्लिअलयेत्यत्र। पुष्पितलताः नियवि दृष्ट्वा

ओजे दश समे पञ्चदश केतकीकुसुमम् । यथा—

बिंबालिउ भुवणु । नवकेयइकुसुमपराइण[1] ॥
नं अहिवासिअउं । मयरद्धयकम्मणजोइण ॥ ३५ ॥

ओजे दश समे षोडश नवविद्युन्माला । यथा—

ओ चलचलंतिआ । विप्फुरेइ नवविज्जुमालिआ ॥
मेहरक्खसस्स[2] । जीहिअव्व[3] दीहरकरालिआ ॥ ३६ ॥

ओजे दश समे सप्तदश त्रिवलीतरङ्गकम् । यथा—

दीहरच्छिआए[4] । पेच्छ सहए तिवलीतरंगयं ॥
कयतिहुअणविजए । लीहतिअं पिव कामिण कड्ढिअं[5] ॥ ३७ ॥

एवं सप्त । तथा ओजे एकादश समे द्वादश अरविन्दकम् । यथा—

प्रियहि मुहु अरविन्दु । चलनयण इन्दिन्दिरु ॥
दन्तकन्ति केसरु । लच्छिविलासमन्दिरु ॥ ३८ ॥

ओजे एकादश समे त्रयोदश विभ्रमविलसितवदनम् । यथा—

कुइ धन्नु जुआणउ । विअसिअदीहरनयणिए[6] ॥
माणिज्जइ तरुणिए । विब्भमविलसियवयणिए ॥ ३९ ॥

ओजे एकादश समे चतुर्दश नवपुष्पन्धयम् । यथा—

सहि पंकोप्पन्नुवि । कमलु तं सलहिओ[7] बुहसइहिं ।
जं रसउद्धुसिअहिं[8] । पिज्जइ नवफुल्लंधुअहिं ॥ ४० ॥

---

[1] परायण NA. [2] महरक्खसस्स Bom. [3] जोहिअव्व Bom.
[4] दीहरच्छीआए Bom. [5] कढ्ढिअं Bom. [6] नयणीए SA.
[7] लसहिओ Bom. [8] उद्धुसिएहिं SA.

---

मधुकरवृन्देन तथा गीतं यथा वाष्पार्द्रितनयनाः पदमपि न ददति के पथिकाः ॥ ३४ ॥ बिंबालिउ इत्यत्र । नूतनकेतकीपरागेण भुवनं विंबालिउत्ति व्याप्तम् । नमिति उत्प्रेक्षायाम् । मकरध्वजकार्मणयोगेनाधिवासितमिव ॥ ३५ ॥ ओ चलेत्यत्र । विस्फुरति नवविद्युन्मालिका इवोत्प्रेक्षते मेघराक्षसस्य दीर्घा कराला जिह्वेव ॥ ३६ ॥ दीहरच्छिआए इत्यत्र । दीर्घाक्ष्याः पश्य राजते त्रिवलीतरङ्गितं त्रिभुवनविजये कृते कामेन रेखात्रिकमिव कर्षितं न मत्सदृशो भुवनत्रये कोपि जयीति भावः ॥ ३७ ॥ प्रिअहि मुहु इत्यत्र । प्रियायाः मुखं कमलं वर्तते चलनेत्रौ(त्रे) भ्रमरौ दन्तकान्तिः केसराणि लक्ष्मीविलासमन्दिरम् ॥ ३८ ॥ कुइ धन्नु इत्यत्र । कोपि धन्यो युवा विकसितदीर्घनयनया तरुण्या मान्यते कीदृश्या विभ्रमविलसितवदनया । तस्या रूपोत्कर्षः ॥ ३९ ॥ सहि पंकोप्पन्नुवीत्यत्र । हे सखि तत्कमलं बुधशतैः